वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम् ॥”
स्कन्दपुराणम् ।
“वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता ।
तत्र मां लेपयेद्गन्धलेपनैरतिशोभनैः ॥” *॥
ब्रह्मपुराणम् ।
“वैशाखशुक्लपक्षे तु तृतीयायां जनार्द्दनः ।
यवानुत्पादयामास युगञ्चारब्धवान् कृतम् ॥
ब्रह्मलोकात्त्रिपथगां पृथिव्यामवतारयत् ।
तस्यां कार्य्यो यवैर्होमो यवैर्व्विष्णुं समर्च्चयेत् ॥
यवान् दद्यात् द्विजातिभ्यः प्रयतः प्राशयेद्-
यवान् ।
पूजयेत् शङ्करं गङ्गां कैलासञ्च हिमालयम् ॥
भगीरथञ्च नृपतिं सागराणां सुखावहम् ।
स्नानं दानं तपः श्राद्धं जपहोमादिकञ्च यत् ॥
श्रद्धया क्रियते तत्र तदानन्त्याय कल्पते ॥
अत्रानन्त्यफलश्रुतेः पूर्व्ववचने नञ्प्रयोगः पक्षा-
विशयार्थः ।” इति तिथ्यादितत्त्वम् ॥ * ॥
पाद्मे श्रीवराहधरणीसंवादे ।
“त्रेतायुगं तृतीयायां शुक्लायां माधि माधवे ।
प्रवृत्तञ्च त्रयीधर्म्माः प्रवृत्तास्ते प्रवर्त्तिताः ॥
अक्षया सोच्यते लोके तृतीया हरिवल्लभा ।
स्नाने दानेऽर्च्चने श्राद्धे जपे पूर्व्वजतर्पणे ॥
येऽर्च्चयन्ति यवैर्व्विष्णुं श्राद्धं कुर्व्वन्ति यत्नतः ।
तस्यां ददति दानानि धन्यास्ते वैष्णवा नराः ॥”
इति श्रीहरिभक्तिविलासे १४ । १३४ ॥

तृतीयाकृतं, त्रि, (तृतीयं कर्षणं कृतम् । “सङ्ख्यायाश्च गुणान्तायाः” इत्यादि ... “कृञो द्वितीयतृतीयशम्बबीजात् कृषौ ।” ५।४।५८। इति डाच् ।) वारत्रयकृष्टक्षेत्रम् । इत्यमरः ।२।९।९। तिनवार चाष देओया क्षेत इति भाषा ॥

तृतीयाप्रकृतिः, स्त्री, (तृतीया प्रकृतिः । “संज्ञा-पूरण्योश्च ।” ६ । ३ । ३८ । इति न पुंवद्भावः ।) नपुंसकम् । इत्यमरः । २ । ६ । ३९ ॥

तृद, हिंसे । (भ्वां-परं-सकं-सेट् ।) तर्द्दति । इति दुर्गादासः ॥

तृद, उ ञ ध इर् । अनादरे । हिंसे । इति कवि-कल्पद्रुमः ॥ (रुधां-उभं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) उ, तर्द्दित्वा तृत्त्वा । ञ ध, तृणत्ति तृन्ते । इर्, अतृदत् अतर्द्दीत् । इति दुर्गादासः ॥

तृन्प, श प्रीणने । इति कविकल्पद्रुमः ॥ (तुदां परं-सकं-सेट् ।) प्रीणनमिह प्रीतीभावः । श, तृपति तृम्पति वा लाभालोकः । ततृम्प । इति -दुर्गादासः ॥

तृन्फ, श प्रीणने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, तृफति तृम्फति । ततृम्फ । इति दुर्गादासः ॥

तृन्ह, ऊ श हिंसे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-वेट् ।) सप्तमस्वरी । ऊ, अतृंहीत् अतृङ्क्षीत् । श, तृहति । इति दुर्गादासः ॥

तृप, कि सन्दीपने । प्रीणने । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट् ।) कि, तर्पयति तर्पति । योऽग्निचयं तर्पयतीति हलायुधः । इति दुर्गादासः ॥

तृप, न प्रीणने । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) प्रीणनं प्रीतीकरणम् । न, तृप्नोति पितरं पुत्रः । ततर्प । इति दुर्गादासः ॥

तृप, प श प्रीणने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) प श, तृम्पति ततर्प । इति दुर्गादासः ॥

तृप, ष्णि ल य ऊ प्रीणने । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सकं च-वेट् ।) ष्णि, तृप्तोऽस्ति । ल, अतृपत् । अस्य लृदित्वेऽपि कथन्तृपदृपेत्यादि-विशेषविधानात् पक्षे ङ्याविकल्पेन अताप्सीत् अत्राप्सीत् अतर्पीदित्यपि । य, तृप्यति । ऊ, तर्पिष्यति तर्प्स्यति । प्रीणनमिह प्रीतीभावः प्रीतीकरणञ्च । स्वन्दीनि तृप्यतु मधूनि पिब-त्रिवायमिति श्रीहर्षः । पितॄनताप्सीन्नृपरक्ततोयै-रिति भट्टिः । इति दुर्गादासः ॥

तृपत्, पुं, (तृप्नोति प्रीणयतीति । तृप+“संश्च-त्तृपद्वेहत् ।” उणां २ । ८५ । इति अतिप्रत्ययेन निपातनात् साधुः ।) चन्द्रः । इत्युणादिकोषः ॥ छत्रम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (प्रीणयति, त्रि । यथा, ऋग्वेदे । २ । २२ । १ । “तृपत्सोममपिबद्विष्णुना सुतं यथावशत् ।” “तृप प्रीणने तुदादिः । आगमानुशासनस्या-नित्यत्वान्नुमभावः तृप्यन् इन्द्रः ॥” इति सायनः ॥)

तृपला, स्त्री, (तृप्यतीति । तृप प्रीणने+“कल-स्तृपश्च ।” उणां १ । १०६ । इति कलः । तत-ष्टाप् ।) लता । इत्युणादिकोषः ॥ त्रिफला । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (क्षिप्रप्रहा-रिणि, त्रि । यथा, ऋग्वेदे । ६ । ६७ । ८ । “प्रशंसासस्तृपलं मन्युमच्छामादस्तं वृषगणाः अयासः ॥” “तृपलशब्दः क्षिप्रवाची । तदुक्तं यास्केन । तृपलप्रभर्म्मा क्षिप्रप्रहारीति । क्षिप्रप्रहारिणं मन्युम् ।” इति सायनः ॥)

तृप्रः, त्रि, (तृप प्रीणने+क्तः ।) तृप्तियुक्तः । इत्यमरः । ३ । १ । १०३ ॥ (यथा, नैषधे । ३ । ९३ ।
“मुहान्तसम्भोगनितान्ततुष्टे
न नैषधे कार्य्यमिदं निगाद्यम् ।
अपां हि तृप्ताय न वारिधारा
स्वादुः सुगन्धिः स्वदते तुषारा ॥”)

तृप्तिः, स्त्री, (तृप प्रीणने+भावे क्तिन् ।) भक्ष-णादिनाकाङ्क्षानिवृत्तिः । तत्पर्य्यायः । सौहि-त्यम् २ तर्पणम् ३ । इत्यमरः । २ । ९ । ५६ ॥ प्रीणनम् ४ आसितम्भवम् ५ । इति शब्द-रत्नावली ॥ (यथा, देवीभागवते ।१।१।२० । “श्रुतान्यन्यानि सर्व्वज्ञ ! त्वन्मुखाग्निःसृतानि च । नैव तृप्तिं व्रजामोऽद्य सुधापानेऽमरा यथा ॥”)

तृप्रः, पुं, (तृप्यत्यनेनेति । तृप+“स्फायितञ्चीति ।” उणां २ । १३ । इति रक् ।) घृतम् । इत्यु-णादिकोषः ॥ पुरोडाशः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (तर्पके, त्रि । यथा, ऋग्वेदे । ८ । २ । ५ । “न यं शुक्रो न दुराशीर्न तृप्रा उरुव्यचसम् । अपस्पृण्वते सुहार्दम् ॥” “तृप्रास्तर्पका अन्ये चरुपुरोडाशादयश्च यमिन्द्रं नापस्पृण्वते न न प्रीणयन्ति अपि तु प्रीणयन्त्येव तमिन्द्रं स्तुमः इति शेषः ।” इति तद्भाष्ये सायनः ॥)

तृफ, प श प्रीणने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) प श, तृम्फति ततर्फ । इति दुर्गादासः ॥

तृफला, स्त्री, (तृम्फति प्रीणातीति । तृफ+“कल-स्तृपश्च ।” उणां १ । १०६ । इति चकारात् तृफतेरपि कलः ।) त्रिफला । इति त्रिकाण्ड-शेषः ॥

तृफूः, पुं, (तृफति पीड़यतीति । तृफ क्लेशे+ “खर्ज्जादिभ्य ऊः ।” १ । ४६६ । इत्युणादिकोष-टीकाधृतसूत्रेण ऊः । निपातनात् न गुणः ।) सर्पजातिः । इत्युणादिकोषः ॥

तृष, इर् य तृष्णि षि । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् ।) इर्, अतृषत् अत-र्षीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । य, तृष्यति । ष्णि, तृषितोऽस्ति । तृट् आकाङ्क्षा । तथा च । इच्छाकाङ्क्षा स्पृहेहा तृट् वाञ्छा लिप्सा मनोरथः । इत्यमरसिंहः । तदुप-स्थितमग्रहीदजः पितुराज्ञेति न भोगतृष्णयेति रघुः । तृष्यति धनं लोकः । तृषि पिपासायाा-मिति प्राञ्चः । तृष्यति तोयं पान्थः । इति रमानाथः । इति दुर्गादासः ॥

तृषा, स्त्री, (तृष+क्विप् पक्षे टाप् ।) तृष्णा । (अस्याः निवारणोपायो यथा,—
“काश्मर्य्यं पद्मकोशीरं द्राक्षामधुकचन्दनम् ।
बालकं शर्करायुक्तं क्वाथं पित्ततृषापहम् ॥
वटद्रुमो रोध्रसिता च चन्दनं
सदाड़िमं तण्डुलधावनेन ।
पिष्टं सुशीतेन जलेन चापि
पीतञ्च पित्तोत्थतृषापहञ्च ॥”
इति हारीते चिकित्सितस्थाने चतुर्द्दशेऽध्याये ।
भुक्तोद्भवायास्तृषाया हेतुर्यथा,—
“स्निग्धं तथाम्लं लवणञ्च भुक्तं
गुर्व्वन्नमेवाशु तृषां करोति ॥”
इति वैद्यकमाधवकरकृतरुग्विनिश्चये तृषाधि-कारे ॥) इच्छा । (यथा, हितोपदेशे ।१।१४६ ।
“लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्त्तो दुःखमाप्नोति परत्रेह च मानवः ॥”) कामकन्या । इति शब्दरत्नावली ॥ लाङ्ग-लिकीवृक्षः । इति शब्दचन्द्रिका ॥

तृषाभूः, स्त्री, (तृषाया भूरुत्पत्तिस्थानम् ।) क्लोम । इति शब्दचन्द्रिका ॥

तृषाहं, क्ली, (तृषां हन्तीति । हन+डः ।) जलम् । इति शब्दचन्द्रिका ॥

तृषाहा, स्त्री, (तृषां हन्तीति । हन+डः+ टाप् ।) मधुरिका । इति शब्दचन्द्रिका ॥

तृषितः, त्रि, (तृट् तृषा वा सञ्जातास्य । तारका-दित्वात् इतच् ।) तृष्णायुक्तः । तत्पर्य्यायः ।